# गुरुपरंपरे नमन

ब्रह्मांता गुरवः साक्षात् इष्टं दैवम् श्रियः पतिः ।
आचार्याः श्रीमद् आचार्याः संतु मे जन्म जन्मनि ॥

पूर्णप्रज्ञकृतं भाष्यमदौ तद्भावपूर्वकम् ।
यो व्याकरोन्नमस्तस्मै पद्मनाभाख्ययोगिने ॥

ससीता मूलरामार्च कोशेग जपतेः स्थिता ।
येनानीता नमस्तस्मै श्रीमनृहरि भिक्षवे ॥

साधिताखिल सत्तत्वं बाधिताखिल दुर्मतम् ।
बोधिताखिल सन्मार्गं माधवाख्ययतिं भिक्षवे ॥

यो विद्यारण्य विपिनंतत्त्वमस्यसिनाऽच्छिनत्
श्रीमद् अक्षोभ्यतीर्थाय नमस्तस्मैमहात्मने ॥

मिथ्यासिद्धांत दुर्ध्वांत विध्वंसन विचक्षणः ।
जयतीर्थाख्य तरणिर्भासतां नो हृदंबरे ॥

चित्रैः पदैश्च गंभीरैः वाक्यैः मानैर् अखंडितैः ।
गुरुभावम् व्यंजयन्ती भाति श्री जयतीर्थ वाक् ॥

कंसध्वंसिपधांभोज संसक्तोहंसपुंगवः ।
ब्रह्मण्य गुरुराजाख्यो वर्ततां मम मानसे ॥

ज्ञानभक्तिवैराग्यभक्त्यादिकल्याणगुणाशालिनः ।
लक्ष्मीनारायणमुनीन् वंदे विद्यागुरून्मम ॥

काले फलति सुरुद्रुमः चिंतामणिरपि याचने दाता ।
वरार्थि सकलम् अभीष्टं दर्शन मात्रात् श्रीपादराजो मुनिः ॥

अर्थिकल्पित कल्पोयं प्रत्यर्थि गज केसरी ।
व्यासतीर्थ गुरुर्भुयाद् अस्मद् इष्टार्थ सिद्धये ।

येन वेदांत भाष्याणि विवृतानि महात्मना
तं वंदे व्यासतीर्थाख्यं वेदांतार्थप्रसिद्धये।

तपोविद्या विरक्त्यादि सद्गुणौ घाकरानहम् ।
वादिराज गुरून् वंदे हयग्रीव दयाश्रयान् ॥

भक्तानां मानसाम् भोज भानवे कामधेनवे ।
नमतां कल्पतरवे विजयींद्र गुरवे नमः ॥

तम्वंदे नृसिंह तीर्थ निलयं श्री व्यासरात् पूजितं ।
ध्यायंतं मनसा नृसिंह चरणं श्री पादराजं गुरुं ॥

भावबोध कृतं सेवे रघूत्तम महागुरुम् ।
यच्छिष्य शिष्य शिष्याद्याः टिप्पण्याचार्य संजिताः ॥

पूज्याय राघवेंद्राय सत्यधर्म रताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥

दुर्वादि ध्वांतरवये वैष्णवेंदीवरेंदवे ।
श्रीराघवेंद्रगुरवे नमोत्यंतदयाळवे ॥

आपाद मौळि पर्यंतं गुरुणां आकृतिं स्मरेत् ।
तेन विघ्नाः प्रणश्यंति सिद्ध्यंति च मनोरथाः ॥

पृथ्वी मंडल मध्यस्थाः पूर्णबोध मतानुगाः ।
वैष्णव विष्णुहृदयस्तान्नमस्ये गुरून्मम ॥